No. २०५ / घ

Title वैयाकरणभूषणसार:

Author कोण्डभट्ट:

Extent १६ पत्र   Age [illegible]

Subject व्याकरण

MISSING-A 1-26

क्रमांक 103 ग्रन्थः वैयाकरणभूषणसारः

Fo. 16 sheets from 27

४२ [illegible]

[illegible] तक

२०५

बोधकत्वात् अन्यथा गंगातीरयोः संबन्धाग्रहवतो गंगापदशक्तिज्ञानवतो ऽपि गंगायां घोष इति वाक्यात्तीरबोधप्र
संगः शक्तिज्ञानस्य हेतोः सत्त्वात् अपि च घटमानयेति वाक्ये हस्तिनं च स्म[illegible]घटपदादिभ्यो घटादेः गजादि स्मि
पकस्य च स्मरणवतो घटानयनवद् हस्तिपकस्यापि शाब्दबोधापत्तिः सम्बन्धा[illegible]न द्रव्यायां पदार्थविषयितां प्रति
जन्यत्वसम्भवात् तथा च विषयतया शाब्दबोधं प्रति तदंशविषयकत्वेन जन्यतावच्छेदकतानिर्देशन्तरीति वाच्यम् एवं च ल
क्षणाज्ञानस्यापि शक्तिज्ञानत्वेन हेतुत्वमसंभवद्युक्तिकमिति एतेन शक्तिप्रयोज्यबोधविषयितानिर्देशेनेति लक्षणा
ज्ञानकार्यकारणभावान्तरं समाधीति परास्तम् प्रयोज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वादित्यादि विस्तरेण प्रपंचि
तं मञ्जूषायां ॥ १ ॥ नन्वेवं भाषादितो बोधदर्शनाद्बोधकतारूपा शक्तिस्तत्रापि स्यात् तथा च साधुतापि स्यात् शक्तत्व
स्यैव साधुतया व्याकरणाधिकरणे प्रतिपादनादिव्याशंकां द्विधा समाधत्ते असाधुरनुमानेन वाचकः कैश्चिदिष्य
ते वाचकत्वाविशेषे वा नियमः पुण्यपापयोः असाधुः गाव्यादिः अनुमानेन साधुशब्दमनुमाय वाचकः ॥
बोधकः कैश्चिदिष्यते तथा च लिपिवत्तेषां साधुस्मरण एवोपयोगः न तु साक्षात्तद्वाचकत्वमतो न साधुत्वमिति
भावः उक्तं हि वाक्यपदीये ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः अशि
ष्टैरनुगम्यन्ते पर्याया इव साधवः न यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः अंबांबेति यदा बालः शिक्ष्य।

वै भू
२०
27

माणः प्रभायेने अप्यक्तं नहि दृष्टां तेन नव्यक्तेभवतिनिर्णयः एवंसाधोः प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते तेन साधुव्यव
हितः कश्चिदर्थोऽभिधीयते नन्वपभ्रंशानां साक्षाद्वाचकत्वे किं मानं शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेन्न
त्वम् नहि देशभेदेन भिन्नेषु नन्तेषु तेषु शक्तिकल्पने गौरवात् नच पर्यायत्वकल्पना शंक्या तेषां सर्वदेशेष्वेकत्वाद्भिन
गमनाविरहेण हि सर्वत्र शक्तिकल्पना नह्यपभ्रंशेषु तथा अन्यथाभावाणां पर्यायत्वेन गणनापत्तेश्च एवं च श
क्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतं तन्न्यायेनैव दूष्यम् इदानीं स्वमतमाह वाचकत्वावि
शेषेवेति अयं भावः अपभ्रंशानामशक्तत्वेन तेभ्यो बोध एव न स्यात् न च साधुस्मरणात्ततो बोधः तदविदुषां पा
मराणामपि बोधात् तेषां साधोरबोधाच्च न च शक्तिभ्रमात्तेभ्यो बोधः बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात्
ईश्वरेच्छा शक्तिरिति मते तेषां साधोरबोधाच्च न च शक्तिभ्रमात्तेभ्यो बोधः बोधकत्वस्याबाधेन पि सन्मात्रविषयिण्या
स्तस्याबाधाभावात् शक्तेः पदपदार्थविशेषघटिताया भ्रमासंभवाच्चेति उक्तं च वाक्यपदीये पारंपर्यादपभ्रंशा
विगुणेष्वभिधातृषु प्रसिद्धिमागता येन तेषां साधुरवाचकः दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः अनित्य
दर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययः इति अवाचकः अबोधकः बुद्धिविपर्ययः एत एव वाचका नान्य इति विपर्ययः
त्ययैः किंच विनिगमनाविरहाद्भाषायामपि शक्तिः न च तासां नानात्वदोषः संस्कृतवन्महाराष्ट्रभाषायाः २०

सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहमादवस्थात् किंचानुपूर्वीयदेवच्छेदिका सा च पर्यायेष्विव भाषाणामप्य-
न्यान्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः तथा च संस्कृतवद्भाषाशब्दाः शक्ता एव न च पर्यायतया भाषाणां
गमकतापत्तिः साधूनामेव कोशादौ विभागाभिधानात् नन्वेवं साधुत्वे मानं चास्य ग्रहइत्यत आह नियम इति पुण्यज-
नकबोधनाय साधूनां साधुभिर्भाषितव्यमिति विधिः पापजनकबोधनाय नासाधूनिति निषेधः तथा च पुण्य-
जनकयोग्यत्वं साधुत्वम् पापजनकयोग्यत्वमसाधुत्वम् तज्जनकतावच्छेदिका च जातिः तज्ज्ञापकं कोशादिव्याकरणा-
दि च एवमेव च राजसूयादेर्ब्राह्मणोकलाजनकत्ववत् वादिशब्दानां नाम्यादौ साधुत्वमिति संगच्छते आधुनिकदेवदत्ता-
दिनाम्नामपि द्वादशाहमित्यादिभाष्येण पुण्यादिजनकत्वात्साधुत्वम् एवं च यः शब्दो यत्रार्थे व्याकरणे पुण्यादितः स तत्र
साधुरिति पर्यवसितम् गौणानां पुण्याजनकत्वान्नात्र संस्कारेण प्रवृत्तौ साधुत्वमेव आधुनिकलाक्षणिकानां तु सा-
धुत्वमिष्टमेव अत एव ब्राह्मणायं देहीत्यर्थे ब्रह्मणे देहीत्यादिकं लक्षणया प्यसाधुरित्यादि विस्तरेण प्रपंचितं भू-
षणे २ अतिरिक्तशक्तेर्ग्रहोपायमाह ॥ संबन्धशब्देन संबन्धो योग्यता प्रतियोग्यता समया योग्यता संविन्मात-
त्रादियोग्यवत् ३ संबन्धो विषयः योग्यत्वं प्रतियोग्यता शब्दः प्रतियोग्यताविषय इति समयाद्व्यवहारात् यो-
ग्यतासंविच्छक्तिग्रहः यद्वा पदमत्र योग्यमेतत्तत्संबन्धीति व्यवहारात् ग्राह्येत्यर्थः ॥ इति वैयाकरणभूषणे

सारे शक्तिनिर्णयः ॥ नञर्थमाह नञ्समासे चापरस्य प्राधान्यात्सर्वनामता आरोपितत्वं नञ्द्योत्यं तथा सो
पस्थितसर्ववत् ॥ नञ्समासे अपरस्योत्तरपदार्थस्य प्राधान्यात्सर्वनामतास्ति घटनीति शेषः अत एवारोपित
त्वमेव नञ्द्योत्यमित्यभ्युपेयमिति शेषः अयं भावः असर्व इत्यादावारोपितः सर्व इत्यर्थे सर्वशब्दस्य प्राधान्याद्वा
धात्सर्वनामतास्ति इति अन्यथाऽसर्व इत्यत्र वस्तानस्यात् घटो नास्तीत्यादावभावविषयकबोधनस्य विशे
ष्यतायाः अदर्शनात् असम उदीत्यादावसत्यार्थोबोधोमानतः तथा चासर्वैरित्यादावसिद्धिप्रसंग इति अत्र
चारोपितत्वमारोपविषयत्वम् आरोपमात्रमर्थो विषयत्वं संसर्ग इति निष्कर्षः द्योत्यत्वोक्तिर्निपातानां
द्योतकत्वमभिप्रेत्य घटो नास्ति अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्पक्षान्तरमाह ॥
अभावो वा तदर्थोस्तु भाष्यस्य हि तदाशयात् विशेषणविशेष्यो वान्यायतस्त्वविधार्थता तदर्थो नञर्थोऽर्थ
वद्योत्यत्ववाच्यत्वपक्षयोः साधारणेन कीर्तितः भाष्यस्येति तथा च नञ्सूत्रे महाभाष्ये निवृत्तपदार्थ
क इति निवृत्तपदार्थो यस्य नञ्समासे भावे क्तः अभावार्थकत्वं निर्वृ... यत्र निवृत्तः पदार्थो यस्मिन्निति तदर्थः सर्व
शब्दादिना ध्यारोपितब्राह्मण्याः क्षत्रियादयो यस्य ... इति कैयटः तत्र आरोपितब्राह्मण्यस्य क्षत्रिया
देर्नञ्वाच्यत्वात् अन्यथासादृश्यादेरविवाच्यतापत्तेः यत्तु तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता अप्राश २८

स्यंविरोधस्तु नञर्थाः बहुव्रीहौ कीर्त्तिताः इति वचित्वा अब्राह्मणः अपापं अनघः अतद्रूपा कन्या अयशो वार
अमेयो अप्रभवः अधर्म इत्युदाहरंति नन्वार्थिकार्थमभिप्रेत्येत्रिस्पष्टमन्यत्र विशेषणमिति प्रतियोगिनीतिशे
षः तथाचासर्वपदे सर्वनामसंज्ञा अनेकमन्यपदार्थे सत्यनेनेकयासन्नतायां गयेत्यादि एकशब्दार्थप्राधान्या
देकवचननियमः अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यान्नरुबहुत्वं अत्वं भवसि अनहं भवामि इत्यादौ तु
रुषवचनादिव्यवस्था चोपपद्यते अन्यथा त्वद्भावो मद्भाव इति वद्भावो शेषु पमद्स्मदोरन्वयेन युष्मत्सा
मानाधिकरण्यस्य तिङ्·ष्वसत्वात् पुरुषव्यवस्था न स्यात् अस्मन्मते च भेद प्रतियोगित्वद्भिन्नात्मधिर
काभवनत्रिये त्वन्नयात्सामानाधिकरण्यमानुपपन्नमिति भावः विशेष्योवेति प्रतियोगिनीतिशे
षः अयं भावः गौणत्वेपि नञ्समासे एतन्नदोषस्तु लोपो कारनञ्समासे हलीति लोपकात्सर्वनामसंज्ञाना
नुपपन्ना असः शिवरत्यत्र स्तु लोपवारणाय नञ्समासे इति विशेषणम् नचनञनञ्चेष्टस्य सर्वनाम
तास्ति गौणत्वात् सकोरित्यत्र हिनक्या हन्ना सर्वनाम्नैरेव ग्रहणलाभात् तथा चानञ्समास इति लोपकं
स्ववचम् अनेकमन्यपदार्थे इत्यादावेकवचनं विशेष्यानुरोधात् स्त्रबामे त्रिनेपराङ्·वस्वरस्यतोत्तु
वर्त्तमानेस्त्वग्रहणं विशेष्यमेकवचनान्तमेव किंचानेकशब्दाद्विवचनोपादाने बहूनां वहुवचनोपात्त

वै॰भू॰ २८ 29 नेबहूनांवचनोपादाने द्वयोर्वैकद्वौहिर्नेत्यादिष्वभयसंग्रहायैकवचनेनाप्यभिप्रायमौत्सर्गिकंवा
सेव्यमेनेकयेन्यत्रापियोवयेतिविशेष्यानुरोधात्स्यैकसेवकौ नान्वयबोधनायचैकवचनंतत्रद्वयका
र्थप्राधान्यमयुक्तम् अतएववपत्न्यानेकेजलधेरिवोर्मयइत्यादिकमपिसूपपादम् अन्येवचसी
त्यादौयुष्मदस्मदिन्दुलक्षणस्यद्योतकः तथाचभिन्नेनयुष्मदर्थेनात्तिङः सामानाधिकरण्या
सहबध्यव्यवस्था त्वदिन्नाभिन्नाश्रयिकाभवनक्रियेतिशाब्दबोधः एवंत्वंनपचसीत्यत्रत्वदभि
न्नाश्रयकाकानुकूलभावनाभावः घटोनास्तीत्यत्रघटाभिन्नाश्रयकास्तित्वाभावइतिरीत्याबो
धः असमस्तनञः क्रियायामेवान्वयात् सत्ताभावोन्यत्राभावत्वात्योन्याभावत्वादिरूपेणशक्यः
तत्तद्रूपेणबोधादित्यायन्यत्रविस्तरः ॥ इतिवैयाकरणभूषणसारेनञर्थनिर्णयः ॥ प्रादयोद्यो
तकाश्चादयोवाचकाइतिनैयायिकमतमयुक्तं वैषम्येबीजाभावादितिध्वनयन्निपातानांद्योतक
त्वंसमर्थयते द्योतकाःप्रादयोयेननिपाताश्चादयस्तथा उपास्येतिहरिहरौ लकारोदृश्यतेयथा
१ येनलेभ्वनाप्रादयोद्योतकास्तेनैवहेत्वनाचादयोनिपातास्तथाद्योतकाइत्यर्थः अयंभावः ईश्व
रमनुभवतीत्यादावनुभवादिः प्रतीयमानोनधात्वर्थः भवतीत्यत्राप्याप्तेः नोपसर्गार्थः तथा २८

सत्यप्रकृत्यर्थे तयानत्राख्यातार्थानन्वयापत्तेः अन्यथा नांप्रकृत्यर्थान्वितस्वार्थबोधकत्वरूपात्तेः अनुगतत्वीत्यादावनुभवा
दित्यन्यथापत्तेस्तत्र विशिष्टार्थः गौरवात् तथाचधात्वर्थविशेषमात्रवादिवाचकस्यास्तु लक्षणा उपसर्गस्तात्पर्यग्रा
हकइत्यस्तु तथा च तात्पर्यग्राहकत्वमेवद्योतकत्वमिति तच्चादिष्वपि तुल्यं चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्ट
चैत्रपदलक्ष्यं इवशब्दस्तात्पर्यग्राहकइत्यस्य सुवचत्वादिति स्वयं तु सूत्रकृदाह उपास्तेरर्थे इति अथवानुपासनाकिमु
पसर्गस्यार्थो विशिष्टस्य धातुमात्रस्यवानाद्यः तथा च सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्म
कत्वस्यासधातोरुपासनारूपफलवाचकत्वाभावादनापत्तेस्तत्र कर्मणि लकारोनस्यात् न द्वितीयः गौरवात् तत्री
येत्वागतेर्द्योतकत्वं तात्पर्यग्राहकत्वलाभात् इति भावः इत्यपेतेरन्यत्र कर्मत्वेनेतिशेषः तच्चादिष्वपि तुल्यमि
त्याह तथान्यत्र निपातेऽपि लकारः कर्मवाचकः विशेषणप्रयोगोपि द्वित्वादिकं समासः अन्यत्र साक्षा
त्क्रियते अलंक्रियते ऊरीक्रियते शिवइत्यादौ अत्रापि धातोस्तदर्थे कर्मणि लकारसिद्ध्यर्थं तदर्थवाचक
त्वं वाच्यमित्युपसर्गवत् द्योतकत्वमसमीचीनमित्यर्थः यद्यपि इत्थं धातोः सकर्मकत्वमस्त्येव तथाप्येतदर्थे
असकर्मकत्वात्तस्यात् अन्यथाकाशमधिकरोत्यसैंधवाविकुर्वतइत्यत्रापिस्यादिति भावः यथोपासनासाक्षात्का
रादिर्निपातार्थोऽस्तु साक्षात्प्रत्यक्षतुल्ययोरिति कोशस्वरसात् तदनुकूलो व्यापार एव धात्वर्थोऽस्तु स्वस्वप्र
कृ निपातान्वितस्वार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमपि स्वतन्त्रमिति दृष्टान्तदार्ष्टान्तिकावसम्भवि

त्विनेदं साधकमिति चेन्न नामार्थधात्वर्थयोरभेदेन साक्षादनन्वयासंभवान्निपातार्थधात्वर्थयोरन्वयस्यैवासंभवा
त् अन्यथा तण्डुलः पचतीत्यत्रापि कर्मत्वयातण्डुलानां धात्वर्थेऽन्वयापत्तेरिति किंच आदीनां वाचकत्वे भूयान् प्रकर्षः
३० कीदृशो निश्चय इति वक्तव्यात् प्रकीदृशोऽतिरिक्तविषयः स्यात् अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इत्यत एव द्योतक
त्वमेवास्यादिति साधकान्तरमभिप्रेत्याह विशेषणेति शोभनः समुच्चयोऽस्त्युच्चय इति वच्छोभनसमुच्चयस्य
स्यायत्तेस्तत्वसमाधेयत्वादिति भावः अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेना
न्वयासंभवः अन्यथा राजपुरुष इत्यत्राप्यापत्तेरित्यभिप्रेत्याह आदीति आदिना षष्ठ्यन्तान्वयः घटस्येदि योः
समुच्चय इति वद्घटस्य च घटादिरस्य चेत्येव स्यादिति भावः २ ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विभक्तिज
न्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नो तद्दोष इत्याशंक्याह पदार्थः सदृशान्वे
ति विभागेन कदाचिन निपातेन तत्संकोचे प्रमाणं किं विभावय २ सदृशासदृशेन समानाधिकरणेनेति यावत् अ
न्वेति अभेदेनेत्यर्थः विभागेनासमानाधिकरणेनेति यावत् अयमर्थः समानाधिकरणप्रातिपदिकार्थयोरभे
दान्वयस्तु त्वन्निर्निपातातिरिक्तविषये नि कल्पने मानाभावो गौरवं चास्माकं निपातानां द्योतकत्वादन्वय एव ना
स्तीति नायं दोषः अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः २ अपि च नि
पातानां वाचकत्वे काव्यादावन्वयो न स्यादिति साधकान्तरमाह शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिवेत्यर्थः अपे १०

एवन

रसानिव इत्यादावनन्वयोऽनस्यान्तु यां त्वश्रवणं मतः ४ अतो नञ्समस्तैः शब्दैरसमस्तशाब्दानुद्देश्यत्वादिष्यन्ति
त्यर्थः अयं चोत्सर्गादिशब्दानां नञ्समस्तशब्दपरत्वे इवशब्दस्येवानन्वयसंगतकत्वे अन्यथा ह्यनन्वयानामप्यन्वयार्था
न्वितत्वस्वार्थबोधकत्वस्य नञ्त्वस्य विरोधः स्यात् तथा हि उत्सर्गादीनां करणे तृतीयानन्वयोऽस्त्रोऽत्र करणम् इवार्थसदृशः
स्य करणत्वे चिन्त्यकरणत्वेनान्वयेन बोधयितुं शक्यम् अनन्वयार्थत्वात् इवशब्दस्य चासत्त्वार्थकत्वात् तत्र तृतीया
यायाः संभवात् संभवे वा श्रवणप्रसंगात् उत्सर्गशब्दोत्तरतृतीयानन्वयप्रसंगाच्चेत्यत आह सुपां चेति सुपां श्रवणं
चेत्यर्थः चकारादुत्सर्गपदोत्तरतृतीयानन्वयः समुच्चीयते इत्यादावित्यादिपदात् वागर्थाविव संपृक्तौ पार्वतीपरमे
श्वरौ वन्दे इत्यत्र वागर्थयोर्वन्दिकर्मत्वाभावात् तत्र द्वितीयायाश्चानन्वयः इवार्थस्य कर्मत्वबोधकासंभवस्य संग्र
हीते यदि च विशेषणविभक्तिरभेदार्थसाधुत्वमात्रार्था तदपि इवशब्दस्यावाचकत्वेनान्वय एव उत्सर्गसदृशशर
णं समानाधिकरणपदोपस्थाप्यतया अभेदेनान्वयायोगात् बाधादभेदेनापि नसः नञ्समस्ताभिन्नसदृशाभिन्नः
शर इत्यर्थोऽप्यदृष्टव्यः ४ नञ्समस्ते अब्राह्मण इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः इवदस्यानर्थकत्वेनोत्त
रपदार्थप्राधान्याभावात् उपसर्गस्यार्थवत्त्वाभावेनाप्रातिपदिकत्वाद्विभक्तिस्तु तेनो न स्यादित्यत आह नञ्स
मासे चापरस्य योऽन्यः प्रत्येवमुच्यते नाथोन्यमेवार्थमादाय जायन्ते नामतः स्वयः ५ नञ्समासादौ योत्तरपद

वै.भू.
३१
31

प्रधानतासाध्योन्यमर्थमादायैव तमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वमित्यर्थः वस्तुतोऽव्ययादाप्सुप इति ज्ञा
पकात्सुबुत्पत्तिर्निपातस्यानर्थकस्येति वार्तिकाद्वा प्रातिपदिकत्वं कृत्तद्धितसमासाश्चेत्यत्रत्यसमुच्चयार्थकच
कारेण निपातानां संग्रह इति वा बोध्यम् तस्माद्युक्तं निपातानां द्योतकत्वम् उक्तं चाहत्याधिकरणवार्त्तिके
चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः तयोरर्थाभिधाने हि व्यापारो नै
व विद्यते यदर्थद्योतकौ तौ तु वाचकः स विचार्यते इति उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते प्रहाराहारसंहा
रविहारपरिहारवदिति हर्युक्तावुपसर्गपदं निपातोपलक्षणं धातुपदं चेतरस्येति बोध्यम् ५ नन्वन्वयव्यति
रेकाभ्यां निपातानां तत्तदर्थवाचकत्वमेव युक्तं बोधकतास्य शक्तेरबाधाच्च किं चोक्तरीत्या पचतीत्यादौ धातो
रेव कर्तृविशिष्टभावनायां लक्षणास्तु तात्पर्यग्राहकत्वमात्रम् तिङादेः स्यादित्यरुचेः पक्षान्तरमाह ६ निपा
तानां वाचकत्वमन्वयव्यतिरेकयोः युक्तं वा नत्वेतदुक्तं परेषां मतमेवतः ६ एवं च धात्वर्थप्रातिपदिकार्थयोर्भे
देनान्वयबोधो न व्युत्पन्न इति निपातातिरिक्तविषयं समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वय इत्यपि
तद्धेत्यगत्या कल्पनीयमिति भावः नञिति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमित्यर्थः यद्वा सर्वेषां निपाता
नां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसंभवान्निपातस्यानर्थकस्येति विधिवैयर्थ्यं सर्वेषां द्योतकत्वे ३१

चानर्थकस्येति व्यर्थं तथा च केचिद् द्योतकाः केचिद्वाचकास्त्वभ्युपेयमिति तन्न एवं हि चादयो द्योतकाः आदयो वा
चकाइति वैपरीत्यावारणात् सर्वेषामनर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय वार्त्तिकारंभस्यैव यत्नदे
स्पष्टत्वाच्च तस्य अन्याख्यानत्वाच्च परेषामिति बहुवचनं मीमांसकसंग्रहाय केवलदृष्टान्तशङ्कासमुच्चयावोधा
च्चकारश्रवणेन द्योत्याच्चकार एव तन्न द्वाचको न द्योतकः किंच द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारा
देर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति समुच्चयाधिकरणेऽस्य तन्त्रतयापि तद्युक्तमिति भावः तथा हि अन्व
यव्यतिरेकाभ्यां तात्पर्यग्राहकत्वेनाप्युपपत्तौ घटादिपदानामेव समुच्चितेलक्षणा तात्पर्यग्राहकः प्रकरणादि
वच्चादिरिति स्वीकारात्तच्छक्तिद्वयकल्पनापि व्यर्था स्माकं लक्षणाग्रहणदशायां बोधात् कार्यकारणभावश्चावश्यकः
एवं शक्तिग्रहस्यापीति पक्षद्वये विकल्पान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम् अत एव
सवाचको विशेषाणां संभवाद्द्योतकोऽपि चेन्निपातः पदीयं संगच्छते दर्शनान्तररीत्या वाचकत्वमेवं द्योतक तः
त्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह मतमेवेति पर्यवसितमुपसंहरन्नाह निपातत्व
परेषां यत्तदस्माकमिति स्थितिः व्यापकत्वाच्चकृतानामाख्यातस्य द्योतकमिच्छते ७ परेषां यन्निपातत्वं स्मस

त्वार्थकत्वे समित्यादिगणपठितत्वं शक्तिसंबंधेन निपातत्वव्यवच्छेदकोपाधिरिति चेन्न देवास्माकमपि परं तु सामा
न्यधर्मे प्रमाणानां वक्ष्यमाणत्वाच्चेत्तन्नाद्योगानेकगणानामत्रव्यवच्छेदे नैव कल्प्यत इति नैयायिकोक्तं आदिचाद्योर्वैयर्थ्यम
युक्तमित्यर्थः व्यापकत्वात् सामान्यत्वात् शक्ततायाः अनुपलक्षणयोगकतायाः अत्यपि द्रष्टव्यम् ॥ इति
वैयाकरणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः संपूर्णः ॥ भावप्रत्ययार्थमाह कृत्तद्धितसमासे
भ्यो मतभेदात् संबंधनम् त्वतलोरर्थकथनं टीकायामाह हरिणा कृतम् कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्र
त्ययेनान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यः इति वार्तिकवच इति मीमांसकादीनां च मतमपाकुर्वन्ना
ह टीकायामिति भर्तृहरिणा महाभाष्यटीकायामित्यर्थः त्वतलोरिति भावप्रत्ययमात्रोपलक्षणं अयमर्थः
समासादौ शक्तिः कल्प्यमाना राजादिसंबंधविशिष्टे कल्प्यत इत्युक्तं तथा च तदुत्तरभावप्रत्ययः संबंधं वदतीत्य
र्थः एतद्द्विभेदः संसर्गद्वयं वेत्युक्ते कुमेदपक्षेन संभवतीत्यत आह मतभेदेति पक्षभेदेनेत्यर्थः एवं च राज
पुरुषत्वमित्यत्र स्वत्वं पक्षे स्वामित्यादौ स्वस्वामिभावः संबन्धः अवयवावयविसंबन्धः क्रियाकारकभावसं
बन्ध इत्यन्वयबोधः औपगवादौ च व्यभिचरितसंबन्धे त्वर्थान्तरवृत्तिस्ताद्धितउदाहार्यः दामोदरत्वेह ३२

त्तस्य सर्वत्वमित्यादौ जातिविशेषेण बोधात् अन्ये त्विति रूढेरभिन्नरूपाव्यभिचरितसंबंधेभ्य इत्यत्रेत्यर्थः
रूढिलक्षणा द्वितीयं यथा शुक्लत्वम् अत्र तदस्यास्त्यस्मिन्निति मत्वर्थीयस्य गुणवचनेभ्यो मतुपो लुगिष्ट इति लुप्तमत्वा
र्थाद् द्वितीयान्तात्त्वे विग्रहः शुक्ल इति अभेदसम्बन्धेन गुणस्यैव प्रकारत्वेन भानं जायते तृतीये समवायो भावः सत्त्वेति अत्र
जातावेव प्रत्यय इति दिक् दण्डीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकत्वानङ्गीकुर्वन्नेव दन्तं मीमांसकप्रत्या
ह अत्राहुर्जरन्नैयायिका दर्शनान्तरगामिनाम् सिद्धान्ते त्वस्य स्थितं पदार्थद्वयं स्यादित्युपलक्षणं २ अत्र भावप्रत्यय
विषये तथाहि दण्डीत्यादौ संबंधात्त्वमित्यादौ भावप्रत्ययस्य संबन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमि
त्यादिष्वपि तदभिधानं न स्यात् प्रकृतिजन्यबोधप्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभावप्रत्ययेनाभिधी
यते अन्यथा घटत्वमित्यत्र द्रव्यत्वादेर्दण्डित्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यतापत्तेः न च तन्म
ते दण्डीत्यादिबोधे संबंधः प्रकारः स च प्रकृत्यर्थासमवेतोऽत्र वाच्यो नास्तीति गुणोपरः तदा तत्त्वत्तलाभावात्सं
बन्धो वाच्यत्वास्थित इति तत्त्वस्य त्वादेः संबन्धवाचकत्वेनोपपन्नावगत्यभावात् प्रपञ्चितं चैतद्वैयाकरणभू
षणे तत्त्वनवार्थीदेवैषम्यं कथमित्यत आह सिद्धान्ते त्विति जायन्त इति वक्ष्यमाणेनान्वितम् सिद्धान्ते प्रकृति
जन्यबोधप्रकारत्वादयो जायन्त इत्यर्थः स प्रकृतिजन्यबोधप्रकारः क इत्यत्र च पदार्थद्वयं स्थितमिति योज

वै॰भू॰
२२
33

ना गौवत्सावाह प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारतामाधर्ममात्रं वाच्यमिति यद्वा शब्दपरादिमौ र जायन्तेज
न्यबोधप्रकारे भावसंज्ञिते प्रयोगोपाधिनिमित्तं प्रकृत्यर्थे प्रकारतयाभासमाने धर्मे वाच्यतयाश्रित्य त्वा
दयो जायन्ते प्रकृत्यर्थबोधप्रकारस्त्वाद्यर्थ इति यावत् ननु घटत्वमित्यत्र प्रकारत्वात्तद्भिन्नत्व प्रत्यये घटत्वत्व
स्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह धर्ममात्रमिति नत्वत्र लघुगुरुविचार इत्यभिप्रायः ननु द्वित्वादि वि
शिष्टव्यक्तिसत्त्वं या एव घटत्वघटत्वत्वादिरूपत्वात् संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु जातिरित्युच्यते
तस्यां सर्वे शब्दा व्यवस्थिताः तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते सा नित्या सा महानात्मा तामाहुस्त्व
तलादयः इति वाक्यपदीयात् उक्तं च तस्य भावस्त्वतलाविति सूत्रे वार्त्तिककारैः यस्य गुणस्य भावाद्द्रव्ये श
ब्दनिवेशस्तदभिधाने त्वतलाविति यस्य गुणस्य विशेषणतया भासमानस्य भावादाश्रयाद्द्रव्ये विशेष्ये
शब्दनिवेशः शब्दप्रवृत्तिस्तस्मिन्वाच्ये त्वतलावित्यर्थः तथा च रूपादिशब्देभ्यो जातौ शुक्लादिदीर्घमहदा
दिभ्यो गुणे पाचकादिशब्देभ्यः क्रियायां घटादिशब्देभ्यो जातौ प्रत्ययः रूपादिशब्दानां जातिप्रकारकबोधज
नकत्वात् पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वेन तस्यां प्रत्ययः संसर्गप्रकारकबोधजनकत्वमि
ति मते च संसर्गे इति व्यवस्था रूपपदे तु भावः जातिवाचकानां व्यक्तय एव शक्यतावच्छेदिकाः तथा च २२

वटत्वमित्यत्र वटवृत्तिरसाधारणो धर्म इति बोध इत्याद्यूह्यम् यद्वान्तरमाह यद्वेति यद्वा सर्वे भावाः स्वेन स्व
रूपेणार्थेन भवन्ति स तेषां भाव इति वार्त्तिकोक्तेः यद्वा शब्दास्तत्स्वरूपं न प्रयोजनका अपि भवन्ति वाचकत्वेन प्र
वर्त्तन्त इति भावाः शब्दाः स्वेनार्थेन स्वरूपेण भवन्ति प्रवर्त्तन्तेऽनेनातः स तेषां भावः प्रवृत्तिनिमित्तमित्यर्थः अ
यं भावः अर्थवत्त्वेऽपि द्विविधः प्रकारः हरिहरनलेहलाऊ युधिष्ठिरवशिष्ठादिशब्देभ्यस्तन्नद्धावाच्यः कश्चिदासीदिति
शब्दप्रकारकबोधस्य सर्वसिद्धत्वात् अन्यथा ववनोबधिवर्गादेर्नाम रिक्तात्मत्वबोधकत्वापत्तेश्च एवमेवाप्रसि
द्धार्थकपदे प्रत्यनुभवः सर्वसिद्धोऽनन्तपदादिवदेषु शिवतत्त्वजात्यादिरूपेण तथा चोभयमवच्छेदकं यस्य तथा शा
क्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः पदप्रकारकः शक्तिग्रहस्तु विशिष्टनावेहितः किं तु इदं पदं चिक्क
णं साधुपदत्वादित्यादिरूप एवातो पदस्य तत्त्वेनेति विशिष्टाप्त हीनशक्तिकेभ्यस्तथैव बोधः तथा च शब्दोऽपि त्व
प्रत्ययार्थ इति प्रपञ्चितं भूषणे ॥ इति वैयाकरणभूषणसारे भावप्रत्ययार्थनिर्णयः ॥ ॥ सास्य देव
तेत्यत्र देवताविशिष्टं देयं प्रत्ययार्थः ऐन्द्रं वैश्वदेवीत्यादौ इन्द्रादेर्देवतात्वाविवस्यावकान्तराभावात्तेन तद्रूपे
णोपस्थितये शक्तिकल्पनावश्यकत्वात् अत एवाभिहितं देवता उक्ता वदन्ये वैषन्तद्धितं तथाभिहितापदसा
न्निध्यात् तस्येव विषयार्पणमिति केवलाद्देवतावाचीनद्धितोत्पत्तेः समुच्चरन्तनात्यग्रुक्तान्निर्देवनं प्र

वै॰भू॰ १४

तिपादयितुं तन्मइति च मीमांसकैरुक्तमित्याशयेनाह अन्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् अभेदश्चात्र सं
सर्गे आग्नेयादावियं स्थितिः देवतायां प्रदेयेवत्वेन शक्तिरस्तु वा एकदेशे देवतात्वे नञ्च विशेषणमभेदेने
त्याह अभेदश्चेति ननु देवतायाः प्रत्ययार्थैकदेशत्वात् प्रकृत्यर्थस्य न तत्राभेदेनान्वय इत्याशयेनाह देवता
यामिति तथा च पदार्थैकदेशत्वेन तास्तीति भावः १ नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या
न च देवतास्वरूपेणोपस्थितये सा कल्प्यते प्रकृतेर्लक्षणयैव तथोपस्थिति संभवात् उपसर्गाणां द्योतकत्वनये प्र
जयतीत्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याह प्रदेयएव वा शक्तिः प्रकृतेस्तु लक्षणा देवतायां निरूढेति
सर्वे पक्षाश्रमी स्थिताः नचैन्द्रं दधीत्यादौ द्रव्यस्य पदान्तराल्लाभात् कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्य
त इति वाच्यम् पदान्तराश्रयणेपि तत्प्रतीतेः ऐन्द्रं दधीति सामानाधिकरण्यात्तु अन्यथा आख्यातस्यापि कर्तृ
कर्मवाचित्वं न स्यात् मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोस्तु द्रव्यं पदान्तरलभ्यमेव एवेति आख्यात
कर्तृ स्यैव द्वाच्यं मास्त्विति कुतो न शक्यते वक्तुमिति दिक् देवतायां देवतास्वरूपेण नीरूढेति अनुपपत्तिस्तानाह
देवतात्वमनादिप्रयोगावच्छिन्नत्वं वा तत्त्वमिति भावः २ अनयैव रीत्यान्यत्राप्यवधेयमित्याह क्रीडायांणस्तु
दस्यास्तीत्यादावेवैव दिवसस्यता वस्तुतोहन्नि रेवतिनात्रातीव प्रयत्यते ३ तदस्यां प्रहरणमिति क्रीडायां १४

णः इत्यत्र प्रहरणविशिष्टक्रीडाप्रहरणक्रीडे क्रीडामात्रं वेत्यर्थः आदिना सोऽस्य निवासः सास्मिन्पौर्णमासीति तद
स्यास्त्यस्मिन्निति मतुबित्यादिकं संगृह्यते इति मात्रेति रिक्तः शब्दैः समर्थः यद्विधिरिति सत्त्वाल्लाभाद्गतो विचा
रः शास्त्रान्तरीयैः सहतन्त्रीन्येवोक्त आरोपितत्वप्रकृतिप्रत्ययार्थमादायैव वा वस्तुतो विशिष्टशक्त्यैव बोधोपस्थिते।
रित्याहुर्वस्तुत इति ॥ इति वैयाकरणभूषणसारे यौगिकार्थनिर्णयः ॥ इति प्रसंगात्त्वाभेदैकत्वसंख्याप्रतीय
त इति सिद्धान्तं दृष्टान्तेनोपपादयति अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः कपिंजलालम्भवाक्ये त्रित्वं न्या
याद्यथोच्यते १ संख्याविशेषणमविभागेन सत्त्वमभेदैकत्वसंख्या उक्तं च वाक्यपदीये यथौषधिरसाः सर्वे मधु
न्याहिततशक्तयः अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुरिति परित्यक्तविशेषं वा संख्यासामान्यमत्र उक्तं च भेदा
नां वा परित्यागात्संख्यात्मा स तथाविधः व्यापाराज्जातिभागस्य भेदापोहेन वर्तते अगृहीतविशेषेण यथा रूपे
ण रूपवान् प्रख्यायते न शुक्लादिभेदापोहस्तु गम्यत इति अत्राज्ञो राज्ञो वायं पुरुष इति जिज्ञासा जायते विशेषजि
ज्ञासा च सामान्यज्ञाने सर्वैकेति सामान्यरूपेण तत्प्रतीतिः शब्दादवश्यकी अनन्तस्याशक्तिरिति तस्या एकत्वे
न प्रतीतौ न्यायमाह कपिञ्जलेति गणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथ
मोपस्थितत्वमस्तीति भावः वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा तथा त्वेवान्नानेकयोः समानप्रकारकत्वेन तद्

गा

वै॰भू॰ ३५ त्वमज्ञातान्तत्वरूपेणैव वाच्यत्वस्यापीति ध्येयम् १ ॥ इति वैयाकरणभूषणसारे भेदैकत्वसंख्यानिरूपणं समाप्तम् ॥ ॥
संख्याप्रसंगादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति ॥ लक्ष्यानुरोधात्संख्यायास्तन्त्रातन्त्रे मते यतः यथैक-
त्वादिहेतूनामाश्रयणमनाकरम् ॥ ग्रहं संमार्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमिति वक्तास्माकमुद्देश्यवि-
शेषणाविवक्षानियमो धातोरित्येकत्वस्याविवक्षितत्वात् अन्यथैतत्समस्तेभ्यो धातुभ्यः प्रत्ययो यदि तदा सर्वैर्विशिष्ये-
त उक्तोऽन्यत्र स्वबर्थवदिति शाब्दान्तराधिकरणे भट्टपादैरभिधानाच्च आर्द्धधातुकस्येड्वलादेरित्यत्रानुवादार्द्धधातुक-
विशेषणस्य वलादित्वस्याविवक्षितत्वाच्च एवं पशुनायजेतेत्यत्र विधेयविशेषणं विवक्षितमित्यपि न रदाभ्यां निष्ठातो
नः पूर्वस्य च द इत्यत्र नकारद्वयविधानात्तापत्तेः तथा च भिन्न इत्यत्र नकारद्वयलाभो न स्यात् आह्नुण इत्यादावेका-
न्वविकल्पयैवोपपत्तौ एकः पूर्वपरयोरित्यत्रैकग्रहणवैयर्थ्यापत्तेश्चेति भावः शब्दार्थस्तु संख्याया लक्ष्यानुरोधा-
त्तन्त्रातन्त्रे यतो मतेऽतः यथैकत्वाद्यधिकरणोक्तहेतूनामाश्रयणं नास्माकमिष्टमिति आदिना ग्रहैकत्वसंग्र-
हः १ ननु विधेयविशेषणाविवक्षायामावश्यकी यन्न्यथानन्तयकारायापत्तेः भिन्न इत्यत्र नकारद्वयवद[illegible]प्याप-
त्तेः एकः पूर्वपरयोरित्यत्रैकग्रहणं चास्यानिमेदादादेशभेदवारणायेत्यभिप्रेत्याह ॥ विधेये भेदकं तन्त्रमन्यतो
नियमान्नहि ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् भेदकं विशेषणं तन्त्रं विवक्षितम् विधेयविशेषणं विवक्षित ३५

भिन्नस्तु तथाप्यन्वयेऽनुवादस्य नियमो नहि कश्चिन्नं चैकत्वविशिष्टेत्यर्थः अथैकत्वादेर्योहेतुः वाक्यभेदादिस्तस्या
श्रवणमस्माकरम् एकत्वविशिष्टधात्वर्थबलादित्वविशिष्टमार्थधात्वर्थं चोद्दिश्य अन्वयेडागमादेर्विधिसंभ
वादिति भावः २ नन्वेवं भिन्नस्य वचनकारद्वयलाभो न स्यादित्यत आह रदाभ्यां वाक्यभेदेन नकारद्वयलाभ
तः इति नैवास्तिटं अन्वयविधेयभेदवाक्यस्य ३ चकारस्तूचितेति ह्यातस्य तः पूर्वस्य टकारस्य च न इति वाक्यभेदेमा
दायनकारद्वयलाभ इत्यर्थः ॥ इति वैयाकरणभूषणसारे संख्याविवक्षानिर्णयः संपूर्णः ॥ क्त्वाप्रत्ययादे
र्थं निरूपयति अव्ययकृत इत्युक्तेः अरन्त्यर्थे तु मादयः समानकर्तृकत्वादि योग्यमेवामिति स्थितिः १ तुमा
दयः तुमन्नादयः अरन्त्यर्थे भावे आदिना क्त्वादेः संग्रहः भावे इत्यत्र मानमाह अव्ययकृत इति अव्ययकृतो
भावे इति वार्तिकादित्यर्थः ननु समानकर्तृकयोः पूर्वकाले इत्यादिसूत्राणां का गतिस्तत्राह समानकर्तृ
कत्वादीति अयं भावः भोक्तुं व्रजति भुक्त्वा व्रजतीत्यादावेकवाक्यता सर्वसिद्धा भोजनपाकक्रिययो विशेषण
विशेष्यभावन्तरेणानुपपन्ना अन्यथा भुंक्ते व्रजतीत्यादावप्येकवाक्यतापत्तेः तथा च तयोर्विशेषणविशेष्य
भावनिरूपकः संसर्गो जन्यत्वं सामानाधिकरण्यं पूर्वोत्तरभावो व्याप्यत्वं चेत्यादिरनेकविधः तथा च भोक्तुं
व्रजति भुक्त्वा व्रजति इत्यादौ भोजनजनिका पाकक्रिया भोजनजन्या त्यागिरिति बोधः अत एव लयानानन्त्र
र्यस्य न दोषस्तन्त्रिपितीत्वात् इति न प्रयोगः समानाधिकरण्यस्यापि संसर्गत्वेनार्थात् समानकर्तृकत्वमपि

लब्धम् भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभावः समानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणानन्तरकालिकी
व्रजनक्रियेति बोधः अधीत्य तिष्ठतीत्यत्र मुखं व्यादाय स्वपितीत्यादौ चाध्ययनव्यादानयोरभावकालेऽप्रयोगाद्यदा
यदा स्वपिति तिष्ठति वा तदा तदाऽध्ययनं मुखव्यादानं चेति कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्याप्यत्वं सामा
नाधिकरण्यं च संसर्गः एवं चान्यलभ्यत्वान्न सूत्रात् तेषां वाच्यत्वलाभ इति ग्रन्थस्याशयस्ततो भाव इति एवं च
प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनां अत एव समानकर्तृकयोरिति सूत्रे स्वशब्दे
नोपात्तत्वात् नेति भाष्यप्रतीकमुपादाय पौर्वापर्यकाले द्योत्ये क्त्वादि विधीयते न तु विषय इति भाव इति कै
यटः यत्तु समानकर्तृकयोरिति सूत्रात् समानकर्तृकत्वं क्त्वामेवाच्यम् अन्यथौदनं पक्त्वाहं भोक्ष्य इत्यत्र मयेति
तृतीयाप्रसंगश्च न चाख्यातेन कर्तुरभिधानान्नेति वाच्यम् भोजनकर्तुरभिधानेऽपि पाकक्रियाकर्तुस्तद
भावात् अनभिहिते भवतीति पर्युदासाश्रयणात् अत एव प्रासादस्थ आस्ते इत्यत्र प्रसादनक्रियाधिकरणस्या
भिधानेऽप्यासनक्रियाधिकरणस्यानभिधानात् सप्तमीति भाष्ये स्पष्टम् तस्मात् क्त्वाप्रत्ययस्य कर्तृवाचित्वमा
वश्यकमिति तन्न सूत्रात्तस्य वाच्यत्वालाभात् समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वेत्येव तदर्थात् अ
न्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात् तृतीयापादनं त्वाख्यातार्थक्रियया प्रधानभूतया कर्तुरभिधा
नात्तद्विरोधेन गुणे कार्यप्रवृत्तेर्न संभव इत्युक्तं च वाक्यपदीये प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् शक्तिर्

ण्याश्रयात्तत्र प्रधानमनुरुध्यते प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते यदा गुणे तदा तद्वदनुक्तापि प्रतीयते
इति किंचान्यथा कर्मणोपि तिङर्थेनापत्तिः पक्वौदनो मया भुज्यत इत्यत्र द्वितीयायां प्रकारान्तरेण वा समा
दित्यास्तां विस्तरः॥ इति वैयाकरणभूषणसारे लकारार्थनिर्णयः॥ सिद्धान्तनिष्कर्षमाह वाक्यस्फोटेति
निष्कर्षे तिष्ठतीति मतस्थितिः साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः १ यद्यपि वर्णस्फोटः पदस्फोटो वा
क्यस्फोटोऽखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्य
ग्रहणमनर्थकं दुरर्थकं च तथापि वाक्यस्फोटातिरिक्तानामन्येषां मध्ये वास्तवत्वबोधनाय तदुपादानमि
ति ध्वनयति अतिनिष्कर्षे इति मतस्थितिर्वैयाकरणानां भाष्यकारादीनां तत्र क्रमेण सर्वांस्तान्निरूपयन्व
र्णस्फोटं प्रथममाह साधुशब्दे इति साधुशब्दान्तर्गता वाचका न वेति विप्रतिपत्तिः विधिकोटिरन्येषां नेति
वैयाकरणानाम् साधुशब्दे रामः पचतीत्यादिप्रयुज्यमानेऽन्तर्गतास्ति विसर्गादय एव बोधका वाचकास्ते
पं॰वस्मारका षामेव शक्तत्वस्य प्राग्व्यवस्थापितत्वात् न तु तैः स्मृता लादयः स्वादयश्चेत्यर्थः १ येन प्रयोगान्तर्गतास्ति
वादयो न वाचकाः तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः एधांचक्रे अभित्यादावादेशभूतलुगादेरभावरूपस्य बो
धकत्वासंभवाच्च आदेशानां भिन्नतया परस्परव्यभिचारित्वात् लः कर्मणि इत्याद्यनुशासनानुपपत्त्याश्च
तथादेशेष्वर्थबोधकमनुशासनमुपलभामहे इत्याहुः तान्त्वसाधकयुक्तिभिर्निरास्तहे व्यवस्थितेर्थेव

द्वेशस्तद्देशन्यायेनस्तथा किंचाख्यातेन शत्राद्यैर्लडेव स्मर्यते यदि १ कथं कर्तृवाच्यत्वे न द्विभावः व्यवस्थातु
रोधात्प्रयोगानुगमात् एव वाचकतातस्तैः स्मृतानामित्यर्थः तथा लिपचतीत्यादौ लकारमविदुषोबोधान्न तस्य
वाचकत्वम् न च तेषां तिङ्क्षु शक्तिभ्रमाद्बोधः तस्य भ्रमत्वे मानाभावात् आदेशिनामपि तत्तद्वैयाकरणैः
स्वेच्छयाभिन्नाभिन्नानामभ्युपगमात् कः शक्तः को नेति व्यवस्थानापत्तेश्च सर्वेषां शक्तत्वे गौरवं व्यभिचारश्चास्त्ये
व आदेशानां प्रयोगानुगमेन तथा नियतत्वात् युक्तं तेषां शक्तत्वं तथा चादेशि कल्पना नैतावता वम् साधकान्तर
माह व्यवहृतेरिति व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः सच श्रूयमाणतिङादिष्वेवेति लाघवात्त एव वाच
कारत्यर्थः किंच तद्धेतुन्यायत इति लकारस्य बोधकत्वे मूलत इत्यतोऽपि बोधः स्यात् तादृशबोधे पचतीति
समभिव्याहारोऽपि कारणमिति चेत्तर्ह्यावश्यकत्वात्तस्तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः अन्य
था लकारस्य वाचकत्वं समभिव्याहारस्य कारणत्वं चेत्युभयं कल्प्यमिति गौरवं स्यात् तथा च तादृशसमभि
व्याहारः समभिव्याहृतावर्णा वेत्यत्र विनिगमकाभावात्प्रयोगानुगतावर्णा वाचका इति सिद्धमिति भावः
अपि च लकारस्यैव वाचकत्वे कर्तृत्रिङः कर्तृभावनावाचकत्वव्यवस्थात्वत्सिद्धान्तस्यादित्याह किंचेति आ
देशानां वाचकत्वे तिङ्त्वेन भावनायामानत्वादिना कर्त्रादिशक्तिरित्युपपद्यते विभाग इति भावः न च शान
जादौ लकारार्थस्यायं शानजर्थ इत्यस्तु कर्त्रादि तत्तु शानजादिनादिनेति शेषवम् स्यात्पर्यन्तनिराका १०

द्वं॰ तयाधानत्वादेः कर्त्तरीत्यस्याप्रवृत्तेः अन्यथा तत्वादावपि प्रवर्त्तेत देवदत्तः पचमान इत्यादिसमानाधिकरण्या
नुरोधान्न च कर्त्ता वाच्यः स्यादित्याशंक्याह नत्वाद्यन्तनिर्दिष्टस्तिनामतामित्युदाहृत्य नामार्थयोरभेदोपि
तस्मात्तुल्यावधार्यतां नाम अथादेशावाचकास्तिन्वदस्फोटस्ततः स्फुटः पचतितरां चैत्रः पचतिकल्पं मैत्र इत्यादिषु
नामार्थत्वाभेदान्वययोः संभव एवेति कर्तृवाचकतास्यादिति भावः न च पचतिकल्पमित्यत्र समानाधिकरण्या
नुरोधात्कर्त्तरि लक्षणा पचमान इत्यत्राव्याप्तेरिति लः कर्मणीत्यनुशासनेन लाववाचकत्वे ललकारे कर्त्रादिवाचि
त्वं कल्पितमादायेत्यन्तम् इति वर्णस्फोटनिरूपणम् एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोपि सिद्ध एवेत्याह
अथेति आदेशाः तिप्तिसर्गादयः अयं भावः समभिव्याहृतवर्णानां वाचकत्वे सिद्धे पदस्फोटोपि नाद्यावर्णस
मभिव्याहाररूपपदस्य वाचकतास्ति ध्वनि इति वर्णमर्थस्मरणस्यानुभवविरुद्धत्वात् प्रत्येकं वर्णो नामर्थवत्त्वेन
प्रातिपदिकत्वापत्तौ नलोपः प्रातिपदिकान्तस्येत्यादिभिर्धनं वनमित्यादौ नलोपापत्तेश्च एतद्द्वयमवर्णए
ववाचकत्वशक्तिः शक्तेर्व्यासज्यवृत्तित्वे मानाभावात् पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहचरमेणार्थधीजननेस
हकारिणा इति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतनान्तरस्य हृदयानुयायम् रामोस्तीति वक्तव्ये।
राम इत्यनेन रं पटिको मरमकारोच्चारणेर्थबोधापत्तानादृश्यानुपूर्व्या एव शक्तत्वावच्छेदकत्वाचित्यादिति दिक् ॥ ६

वै. भू. सुप्तिङंतं पदमिति परिभाषितं पदस्य वाचकत्वस्वीकरणं मतमाह घटेनेत्यादिभिर्न हि प्रकृत्यादिभिदा स्थि
२८ ता वस्तुसादाविवैषापि संप्रमोहो हि रूप्यते ४ घटेनेत्यादौ घटे इति प्रकृतिर्नेति प्रत्ययः घट इति प्रकृतिरे
नेति प्रत्यय इति विभागस्य सर्वसर्वपदादेशा इति स्वीकारे विशिष्टप्रकृतिप्रत्यययोरेतानासंभवान्न वाच
कत्वमित्यर्थः वैयाकरणैर्विभागः कल्पितः इत्यतो दृष्टान्तव्याजेनाह वस्तुसादाविति वह्नुवचनस्य वस्तुसावि
ति समुदायस्यादेशविधानात्तत्र न तद्विभागः संभवतीत्यर्थः ४ सुप्तिङन्तचयरूपवाक्यस्यापि तदाह हरे
वेत्यादि द्वाव वाक्यस्फोटं विनिश्चितु अर्थे विशिष्टसंबन्धावगाहनं चेत्संभवेद् लक्षणं द्धुनाचे न तदेष्य
व र्थे स्तन्नमया हरे विससावेत्यादौ पदयोरेऽः वदान्तादन्तो न्पेकादेशे सति न तद्विभागः सुज्ञानः तथा च प्रत्येकपद
ज्ञानेऽपि समुदायशक्तिज्ञानात् बोधात्समुदाये आवश्यकी शक्तिः एवं प्रकृतिप्रत्ययेष्ठ विशिष्याज्ञायमानेष्वपि समुदाय
मुत्पत्त्या बोधात्तत्राप्यावश्यकैव शक्तिरिति भावः वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यबोध इति पदार्थशक्तिः पदेष्विव वा
क्यार्थे शक्तिर्वाक्येऽभ्युपेयेति पदस्फोट वाक्यस्फोटौ व्यवस्थितौ अन्यथा घटः कर्मत्वमानयनं कृतिरित्यादौ तादृशव्युत्पत्तिर
हितस्यापि बोधप्रसंगः घटमानयेत्यादौ वपदार्थानामुपस्थितौ सत्यपि तात्पर्यज्ञाने बोधाभावाच्च तत्रैव घटकर्मकमान २८
यनं भिन्निर्वौद्ध्यार्थकप्रातिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यका

रणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेन्न हि सिद्धो वाक्यस्फोटः घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानका
र्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनादर्थोपस्थापकज्ञान
विषयशाब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वावगमात् युक्तं चैतत् विषयतासंबन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य तादृशेन
हेतुत्वसिद्धेः विवेचितं चैतद्भूषणे तत्र वाक्यार्थस्यापूर्वत्वात्कथं तत्र शक्तिग्रह इत्याशंक्याह अर्थ इति वाक्यस्येति वाक्यस्य
वाक्यार्थे विशिष्टशक्तिग्रहणं चेन्न हि पदेऽपि समम् पदत्ववान्वयांशे शक्तिरिति पक्षेऽपि तद्ग्रहासम्भवस्तुल्य इत्यर्थः यदि च प
दशक्तिः पदार्थांशे ज्ञाता अन्वयांशे चाज्ञातोपयुज्यत इति अत्र शक्तिवादस्तदा ममापि वाक्यशक्तिरज्ञातैवोपयुज्यत इति वाद
भ्युपगमस्तुल्य इति भावः ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेऽपि तद्ग्रह इति चेत्तुल्यमित्याह लक्षणादिति लक्ष्य
ते तर्कितेनेनेति लक्षणं मनस्तस्मात् अपिः पदपदोत्तं बोध्यः पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्हि स्तवाक्येऽपीति शेषः वस्तुतस्तु समु
दितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहश्चावापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम् ५ इयमेव मीमांसकानां वेदान्त्येकदेशिनां
च गतिरित्याह सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः महास्तेऽपीत्थमेवाकुले लक्षणायाग्रहे गतिम् ६ महा इति तदनुयायिनां
वाचस्पतिमिश्रकल्पतरुप्रभृतीनां मतमुपलक्षणम् स्पष्टमेतत् ननूक्तपक्षद्वयमनुपपन्नम् उत्पन्नेऽभिव्यक्ते वैकदासम्भवेन व
र्णसमूहरूपपदज्ञानासम्भवात् तथा च सुतरां तत्समूहवाक्यज्ञानासम्भव इति चेन्न उत्तरवर्णप्रत्यक्षसमये तस्मिन्नव्यवहितो
त्तरत्वसंबन्धेनोपस्थितपूर्ववर्णवत्त्वम् तथा तदुत्तरप्रत्यक्षकालेऽप्युपस्थित इति विशिष्टतद्वर्णवत्त्वं तस्मिन्नवग्रहमिति मादृशा

नुपपत्तेश्चेति तत्त्वपदत्वस्य वाचकत्वस्यापि संग्रहत्वात् ६ इदानीमखण्डशक्तिपक्षमाह पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च
वै॰ भू॰ वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ७ पदे पचतीत्यादौ न वर्णाः नानावर्णसमूहः पदमिति शेषः दृष्टान्तव्याजेनाह वर्णेष्वि
रू१ ति एकारैकारल्कारऋकारादौ वर्णेष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः क्वचिदिवेत्येव पाठः एवं वाक्येप्याह वाक्या
दिति पदानामपि वाक्याद्विवेको भेदो नास्तीत्यर्थः अयं भावः वाक्यं पदं वाखण्डमेव न तु वर्णसमूहः अनन्तवर्णकल्पने मानाभा
वात् न च वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकतावच्छेदकं वैजात्यमादायैव ककारो गकार इत्यादिप्रती
तिर्वैलक्षण्यसंभवात् स्पष्टं हि भासमानानां कत्वादि वायुनिष्ठं वर्णेष्वारोप्यमत्र उक्तं देवताधिकरणे न चैवं वायुसंयोगस्यैव वाचकोऽपि
किं न स्यादिति वाच्यम् प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात् तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं
मा॰ पदं तदेवेदं वाक्यं सोऽयं गकार इति प्रतीत्यैकोऽखण्डः सिद्ध्यति एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवात्क्रि
यमाणवर्णानामेव वाचकत्वमस्त्वित्यपास्तम् तेषां स्फोटातिरिक्तत्वाभावात् यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधा
पत्तिः समुदायस्य तु क्रमवतामाशुतरविनाशिनां तथैवाभिव्यक्तानां वा ज्ञानमसंभाव्यमेव पूर्वपूर्ववर्णानुभवसंस्कारसहकारेणै
कदा समूहालम्बनरूपसकलज्ञानसंभवस्तु सरो रसः राजा जरा नदी दीनादिसाधारण्यादत्यतिप्रसंग इति स्फोट एवाखण्डो नादा
भिव्यङ्ग्यो वाचक इति कैयटः तत्तुच्छं पदज्ञानसंभवस्योपपादितत्वाच्च वर्णानां प्रत्येकं व्यंजकत्वे समुदितानां वेत्यादिविकल्पग्रा रू१
साच्च ननु त्वन्मतेऽप्येष दोषः तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं प्रत्येकं व्यंजकत्वं समुदितानां वेति विकल्पगणा

नासंभवादिति चेत् उच्यते प्रत्येकमेव संयोगा अभिव्यंजकाः परंतु केचित्स्फुटत्वेन केचिद्दीर्घत्वेन केचिद्विसर्गत्वेनेत्थमनेकैः प्रकारैस्त ए
व वर्णा नाना तदतिरेकास्वीकारेऽप्युपपद्यते एवं चाव्यवहितोत्तरत्वसंबंधेन घटत्वविशिष्टघकारे गृह्यते एतादृशयद्ज्ञानकारणता
या अविवादात् एवं च व्यवहितोत्तरत्वस्वज्ञाताधिकरणत्वादरोपात्यन्तिकज्ञानविषयत्वं वाच्यम् अत एव घज्ञानानन्तरज्ञानवि
षयत्वरूपानुपूर्वीत्यादिनैयायिकवृद्धानां व्यवहारः एवं च न कश्चिद्दोषः एतेन पर्यायस्थले एक एव स्फोटो नाना वा ना
घः घटपद एव गृहीतशक्तिकस्य कलशपदाद्बोधप्रसंगात् न च तत्पर्यायाभिव्यंजकस्फोटशक्तिग्रहस्तत्पर्यायस्थावरोर्थ
धीहेतुरिति वाच्यम् एवं च प्रतिपर्यायं शक्तिग्रहावश्यंभावेन तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात् तथा सति श
क्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च अन्यथा तत्पर्यायाभिव्यक्तिमत्शक्तिग्रहत्वेन तत्त्वे गौरवात् न द्वितीयः अनंतपदार्थानां
तेषां शक्तिमपेक्ष्य लघुत्वं वर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परमलोकमपास्तम् पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्ध
त्वात् तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक् शाब्दकौस्तुभे तु वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः ॥
अन्यथा कपालातिरिक्तघटासिद्धिप्रसंगश्चेति प्रतिपादितम् नन्वेवं शास्त्राप्रामाण्यप्रसंगः पदस्याखण्डत्वात् शास्त्रस्य च प्र
कृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशंकां समाधत्ते पंचकोशादिवत्तस्मात्कल्पनैषा समाश्रिता उपेयप्रतिप
त्त्यर्थोपाया अव्यवस्थिताः २ उपेयप्रतिपत्त्यर्थेत्यत्रेनान्वयः अयं भावः भृगुवल्ल्यां भृगुर्वै वारुणिर्वरुणं पितरं ब्रह्म पृष्टवा
न् स उवाच अन्नमिति तस्यान्नमयादिकं बुद्ध्वा एवं हेत्यत्र प्राणमनोविज्ञानानंदात्मकपंचकोशोत्तरं ब्रह्म प्रकृष्टं प्रतिष्ठेति ज्ञेयं ।

वै॰ भू॰
५॰ ग
५०

ब्रह्मप्रतिपादितम् तत्र कोशपंचकव्युत्पादनं शुद्धब्रह्मबोधनाय एवं प्रकृतिप्रत्ययादिव्युत्पादनं वाक्यस्फोटव्युत्पादना
यैवेति ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितो दितोपि बोधसंभवात् शास्त्रं तदुपाय इत्यत आह उपायस्योपायान्तरापेक्षकत्वात्
तथा च व्याकरणोपासनं त्वज्ञाने वैदान्तं ब्रह्मत्यते मंत्रजन्यमिवार्थस्मरणो वेदान्तजन्यमिव ब्रह्मज्ञाने तस्य च ज्ञानस्य यज्ञादी
नामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वं च तदुक्तं वाक्यपदीये तद्द्वारमपवर्ग
स्य वाङ्मलानां चिकित्सितम् पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् इयं सा मो
क्षमाणानामजिह्मा राजपद्धतिः अत्रातीतविपर्यासः केवलामनुपश्यतीति न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वा
क्यस्फोटबोधः तस्यालीकत्वासिद्धेर्वक्ष्यमाणत्वात् एवं रेखागवयन्याय आदिना गृह्यते ॥ ननु स्फोटस्य वर्णजातीनां च
नित्यतया ककार उत्पन्न इति न स्यात् वायुसंयोगनिष्ठजातेः स्फोटे भानेकादिप्रतीतीनां भ्रमत्वापत्तिश्चेत्यत आह कालिता
प नामधित्वं स्वीकृतं हि परैरपि स्वरदैर्घ्याद्यपि ह्यस्य वर्णेभ्योन्यस्य मन्वते ॥ स्वीकारस्थलमाह स्वरदैर्घ्यादिपीति आदि
नोत्पत्तिविनाशादिसंग्रहः उदात्तत्वादिर्न वर्णनिष्ठं तस्य नित्यत्वादेकत्वाच्च तत्र च स एवायमिति प्रत्यभिज्ञानात् न च गत्वाव
च्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः व्यञ्जकांशभेदस्यापि भासमानस्य विनाबाधकं त्यागायोगात् न चोत्पत्तिप्रतीतिर्बा
धकाप्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात् अत एव वर्णमुच्चारयतीति प्रत्ययो न तूत्पादयतीति प्रत्य ५॰
योव्यवहारश्च उच्चरितत्वं च ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम् किंच यत्र कध्वनिनिष्ठोत्पत्त्यादेः परंपरया वर्ण

निष्ठत्वविषयत्वेनाप्युपपन्नेनेमातिरिक्तवर्णमाधिकापरंपरयावर्णनिष्ठत्वाभ्युपगमात् नथमत्वे साक्षात्संबंधांशेभ्रम इत्यव
शिष्यते तदपिसोयमित्यत्रत्यक्तत्वभेदांशेनवभ्रमत्ववन्नत्स्पर्तंत्रममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पनानेतिलाघवमति
रिच्यते नचवर्णास्थलेध्वनिसत्वेमानाभावइत्यादकशाङ्क्यबाधाभावेनतदसंभवश्चेतिवाच्यम् ककारायुच्चारणस्थलेतत्र
स्यानस्यजिह्वायाईषदन्नरणात्वर्णानत्वतेर्धर्मस्त्वतेश्च दर्शनात्तिहृदाभिघातजवायुकरणसंयोगादेर्ध्वनिजनकत्वकल्पना
त् तस्यचवर्णान्यत्रिस्थलेपिसत्वात् तवैवप्रतिबन्ध्यप्रतिबन्धकभावकल्पनातिप्रसारिणकास्यादिनिगौरवंविपरीतम्
एवंपरस्परविरोधाद्दात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि नवर्णनिष्ठंयुक्तमिति तेषामभिप्रायः एवंचोन्यत्वादिप्रती
च तीनांतत्रमात्रस्यनिर्वाहः परेषामपिसमानइतिप्रतिबंधोबंदीमितिभावः ५ इत्थंपंचव्यक्तिस्फोटाः जातिस्फोटमाह शक्य
त्वइवशक्ततावच्छेदेलाघवमीत्यनाम् औपाधिकोवाभेदोस्तु वर्णानांनानारमेदवत् अयंभावः वर्णस्तावदावश्यकाः उक्तरी
त्यादरेवसोयंगकारइतिवद्योयंगकारः श्रुतः सोयंहकारइत्यपिस्यात् स्फोटस्यैकत्वात् गकारोयंनहकारइत्यनापत्तेश्च किं
चस्फोटेगत्वाद्यभ्युपेयंनवाअद्येतदेवगकोस्तु वर्णानित्यत्वावादिभिरतिरिक्तगत्वानंगीकारात् तथाचातिरिक्तस्फोटकल्पनं
एवगौरवम् अन्येगकारादिप्रतीतिविरोधः वायुसंयोगध्वनिध्वनिहृत्तिवावैजात्यमारोप्यतथाप्रत्ययइतिचेन्न प्रतीतेर्विनाबा
धकंभ्रमत्वासंभवात् अस्तुवावायुसंयोगएवगणुवगकारोपि तस्यातीन्द्रियत्वंदोषइतिचेद्धर्मेवडपपन्नेरितिहृतंस्फोटेन त
स्मात्सन्त्येववर्णाः परंतुनवाचकाः गौरवात् अफृत्स्वधिकरणन्यायेनतज्ञातेरेववाच्यत्वबधाचकत्वस्यापियुक्तत्वाच्च इदंहरिए

वै॰ भू॰
५८

दभिन्नत्वगतप्रतीत्याहुः तेषामपि नित्यावच्छेदेनाहरियदज्ञानत्वेन हेतुत्वान्नदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात् नचव
र्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः घटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादिभिरन्यथासिद्ध्यापत्तेः तस्मात्सा
जातिरेव वाचिकाना ताद्रूप्येन तदवच्छेदिका चेति नच समरो रस इत्यादौ जातेः सत्वादर्थबोधभेदो न स्यादित्यत आह औपाधिको वेति ।
वा त्वर्थे उपाधिस्तु एवौ सैव जातिविशेषाभिव्यक्तिकेति भेदः कारणीभूतज्ञानस्यातिरिक्तविषयता इति भावः उपाधिप्रयुक्तज्ञानवैलक्षण्ये
दृष्टान्तमाह वर्णानामिति १ ननु जातेः प्रत्येकं वर्णेष्वपि सत्वात्प्रत्येकादर्थबोधः स्यादित्यत आह अनेकव्यक्त्यभिव्यङ्ग्या जातिः
स्फोट इति स्मृता कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ११ अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता
योगार्थे तया बोधिके तियावत् एतेन स्फोटस्यानित्यत्वात्सर्वदार्थबोधापत्तिरिति निरस्तम् अयं भावः यद्यपि वर्णस्फोटपक्षे
कश्चित् दोषोस्ति तथापि पदवाक्यपक्षयोर्न तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वात् इति कैश्चिद्व्यक्तय एव ध्वनयः ए
वध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयत इति शेषार्थः उक्तं हि काव्यप्रकाशे बुधैर्वैयाकरणैः प्रधानीभूतस्फोटव्यङ्ग्यव्यञ्जकस्य श
ब्दस्य ध्वनिरिति व्यवहारः कृत इति ११ ननु कासौ जातिरत आह सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ सत्यं यत्तत्र सा जातिर
सत्या व्यक्तयो मताः १२ प्रतिभावं प्रतिपदार्थम् सत्यांशो जातिरसत्या व्यक्तय स्तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः उक्तं च कै ति
यटेन असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थ इति ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीति च कथं तर्हि ब्रह्मदर्श
ने च गोत्वादिजातेरप्यसत्वादनित्यत्वम् आत्मैवेदं सर्वमिति श्रुतिवचनादिति कैयटः संगच्छताम् अविद्या आविद्यको धर्मे ५२

वै.भू. ५२ विशेषो वेति पदात्तान्तरमादायेति द्रष्टव्यम् न मे वसन्यांशं स्पष्टयति इत्थं निष्कृष्यमाणं यत्कूटस्थं तत्त्वं निरञ्जनम् ब्रह्मैवेत्यपरं प्रा
क्स्फूर्णात्मने नमः ॥ अयं भावः नामरूपे व्याकरवाणीति श्रुतिसिद्धा द्वयी सृष्टिः तत्र रूपस्येव नाम्नोऽपि तदेतत्त्वं प्रक्रियांश
स्य विद्याविजृम्भणमात्रम् उक्तं च वाक्यपदीये शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते समारम्भस्तु भावानामनादि ब्रह्म शा
श्वतमिति अस्यैवेत्यनेनात्रायं पुरुषः स्वयंज्योतिः न मे वान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतिसिद्धं स्वपरप्र
काशकत्वं सूचयन् स्फुटत्यर्थो यस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयति निर्विघ्नप्रचयापात्रं मंगलंस्तुति
नुतिरूपमाह स्फूर्णात्मने इत्यादि ॥ अशेषभूषादातारमपि सर्वेश्वरं गुरुम् श्रीमद्भूषणसारेण भूषये शेषभूषण
म् इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणरंगोजिभट्टात्मजकौण्डभट्टकृते वैयाकरणभूषणसारे स्फोटवादः ॥
शुभं भूयात्सर्वेजगताम् ॥ ॥ ॥ ॥ श्री ॥ ॥ ओं ॥ ॥ शुभमस्तु ॥

नं २०८६